# ॥ श्री शिव सहस्रनाम स्तोत्रम् ॥

# Śrī Śiva Sahasranāma Stotram

## ॥ लिङ्ग पुराणम् ॥

## Liṅga Purāṇam

। अथ लिङ्गपुराणान्तर्गत-श्रीशिवसहस्रनामस्तोत्रमन्त्रैः अभिषेकः ।

**। atha liṅgapurāṇāntargata-śrīśivasahasranāmastotramantraiḥ abhiṣekaḥ ।**

। ॐ ।

**। om ।**

ऋषय ऊचुः -

**ṛṣaya ūcuḥ -**

कथं देवेन वै सूत देवदेवान्महेश्वरात् ।

**kathaṁ devena vai sūta devadevānmaheśvarāt ।**

सुदर्शनाख्यं वै लब्धं वक्तुमर्हसि विष्णुना ॥ १ ॥

**sudarśanākhyaṁ vai labdhaṁ vaktumarhasi viṣṇunā ।। 1।।**

## सूत उवाच -

**sūta uvāca -**

देवानामसुरेन्द्राणामभवच्च सुदारुणः ।

**devānāmasurendrāṇāmabhavacca sudāruṇaḥ ।**

सर्वेषामेव भूतानां विनाशकरणो महान् ॥ २ ॥

**sarveṣāmeva bhūtānāṁ vināśakaraṇo mahān ।। 2।।**

ते देवाः शक्तिमुशलैः सायकैर्नतपर्वभिः ।

**te devāḥ śaktimuśalaiḥ sāyakairnataparvabhiḥ ।**

प्रभिद्यमानाः कुन्तैश्च दुद्रुवुर्भयविह्वलाः ॥ ३ ॥

**prabhidyamānāḥ kuntaiśca dudruvurbhayavihvalāḥ ।। 3।।**

पराजितास्तदा देवा देवदेवेश्वरं हरिम् ।

**parājitāstadā devā devadeveśvaraṁ harim ।**

प्रणेमुस्तं सुरेशानं शोकसंविग्नमानसाः ॥ ४ ॥

**praṇemustaṁ sureśānaṁ śokasaṁvignamānasāḥ ।। 4।।**

तान् समीक्ष्याथ भगवान्देवदेवेश्वरो हरिः ।

**tān samīkṣyātha bhagavāndevadeveśvaro hariḥ ।**

प्रणिपत्य स्थितान्देवानिदं वचनमब्रवीत् ॥ ५ ॥

**praṇipatya sthitāndevānidaṁ vacanamabravīt ।। 5।।**

वत्साः किमिति वै देवाश्च्युतालङ्कारविक्रमाः ।

**vatsāḥ kimiti vai devāścyutālaṅkāravikramāḥ |**

समागताः ससंतापा वक्तुमर्हथ सुव्रताः ॥ ६ ॥

**samāgatāḥ sasaṁtāpā vaktumarhatha suvratāḥ || 6||**

तस्य तद्वचनं श्रुत्वा तथाभूताः सुरोत्तमाः ।

**tasya tadvacanaṁ śrutvā tathābhūtāḥ surottamāḥ |**

प्रणम्याहुर्यथावृत्तं देवदेवाय विष्णवे ॥ ७ ॥

**praṇamyāhuryathāvṛttaṁ devadevāya viṣṇave || 7||**

भगवन्देवदेवेश विष्णो जिष्णो जनार्दन ।

**bhagavandevadeveśa viṣṇo jiṣṇo janārdana |**

दानवैः पीडिताः सर्वे वयं शरणमागताः ॥ ८ ॥

**dānavaiḥ pīḍitāḥ sarve vayaṁ śaraṇamāgatāḥ || 8||**

त्वमेव देवदेवेश गतिर्नः पुरुषोत्तम ।

**tvameva devadeveśa gatirnaḥ puruṣottama |**

त्वमेव परमात्मा हि त्वं पिता जगतामपि ॥ ९ ॥

**tvameva paramātmā hi tvaṁ pitā jagatāmapi || 9||**

त्वमेव भर्ता हर्ता च भोक्ता दाता जनार्दन ।

**tvameva bhartā hartā ca bhoktā dātā janārdana |**

हन्तुमर्हसि तस्मात्त्वं दानवान्दानवार्दन ॥ १० ॥

**hantumarhasi tasmāttvaṁ dānavāndānavārdana || 10||**

दैत्याश्च वैष्णवैर्ब्राह्मै रौद्रैर्याम्यैः सुदारुणैः ।

**daityāśca vaiṣṇavairbrāhmai raudrairyāmyaiḥ sudāruṇaiḥ ।**

कौबेरैश्चैव सौम्यैश्च नैर्ऋत्यैर्वारुणैर्दृढैः ॥ ११ ॥

**kauberaiścaiva saumyaiśca nairṛtyairvāruṇairdṛḍhaiḥ ।। 11।।**

वायव्यैश्च तथाग्नेयैरैशानैर्वार्षिकैः शुभैः ।

**vāyavyaiśca tathāgneyairaiśānairvārṣikaiḥ śubhaiḥ ।**

सौरै रौद्रैस्तथा भीमैः कम्पनैर्जृम्भणैर्दृढैः ॥ १२ ॥

**saurai raudraistathā bhīmaiḥ kampanairjṛmbhaṇairdṛḍhaiḥ ।। 12।।**

अवध्या वरलाभात्ते सर्वे वारिजलोचन ।

**avadhyā varalābhātte sarve vārijalocana ।**

सूर्यमण्डलसम्भूतं त्वदीयं चक्रमुद्यतम् ॥ १३ ॥

**sūryamaṇḍalasambhūtaṁ tvadīyaṁ cakramudyatam ।। 13।।**

कुण्ठितं हि दधीचेन च्यावनेन जगद्गुरो ।

**kuṇṭhitaṁ hi dadhīcena cyāvanena jagadguro ।**

दण्डं शार्ङ्गं तवास्त्रं च लब्धं दैत्यैः प्रसादतः ॥ १४ ॥

**daṇḍaṁ śārṅgaṁ tavāstraṁ ca labdhaṁ daityaiḥ prasādataḥ ।। 14।।**

पुरा जलन्धरं हन्तुं निर्मितं त्रिपुरारिणा ।

**purā jalandharaṁ hantuṁ nirmitaṁ tripurāriṇā ।**

रथाङ्गं सुशितं घोरं तेन तान् हन्तुमर्हसि ॥ १५ ॥

**rathāṅgaṁ suśitaṁ ghoraṁ tena tān hantumarhasi ।। 15।।**

तस्मात्तेन निहन्तव्या नान्यैः शस्त्रशतैरपि ।

**tasmāttena nihantavyā nānyaiḥ śastraśatairapi ।**

ततो निशम्य तेषां वै वचनं वारिजेक्षणः ॥ १६ ॥

**tato niśamya teṣāṁ vai vacanaṁ vārijekṣaṇaḥ ।। 16।।**

वाचस्पतिमुखानाह स हरिश्चक्रभृत्स्वयम् ।

**vācaspatimukhānāha sa hariścakrabhṛtsvayam ।**

श्रीविष्णुरुवाच –

**śrīviṣṇuruvāca -**

भोभो देवा महादेवं सर्वैर्देवैः सनातनैः ॥ १७ ॥

**bhobho devā mahādevaṁ sarvairdevaiḥ sanātanaiḥ ।। 17।।**

सम्प्राप्य साम्प्रतं सर्वं करिष्यामि दिवौकसाम् ।

**samprāpya sāmpratam̐ sarvaṁ kariṣyāmi divaukasām ।**

देवा जलंधरं हन्तुं निर्मितं हि पुरारिणा ॥ १८ ॥

**devā jalaṁdharaṁ hantuṁ nirmitaṁ hi purāriṇā ।। 18।।**

लब्ध्वा रथाङ्गं तेनैव निहत्य च महासुरान् ।

**labdhvā rathāṅgaṁ tenaiva nihatya ca mahāsurān ।**

सर्वान्धुन्धुमुखान्दैत्यानष्टषष्टिशतान्सुरान् ॥ १९ ॥

**sarvāndhundhumukhāndaityānaṣṭaṣaṣṭiśatānsurān ।। 19।।**

सबान्धवान्क्षणादेव युष्मान् संतारयाम्यहम् ।

**sabāndhavānkṣaṇādeva yuṣmān saṁtārayāmyaham |**

सूत उवाच -

**sūta uvāca -**

एवमुक्त्वा सुरश्रेष्ठान् सुरश्रेष्ठमनुस्मरन् ॥ २० ॥

**evamuktvā suraśreṣṭhān suraśreṣṭhamanusmaran || 20||**

सुरश्रेष्ठस्तदा श्रेष्ठं पूजयामास शङ्करम् ।

**suraśreṣṭhastadā śreṣṭhaṁ pūjayāmāsa śaṅkaram |**

लिङ्गं स्थाप्य यथान्यायं हिमवच्छिखरे शुभे ॥ २१ ॥

**liṅgaṁ sthāpya yathānyāyaṁ himavacchikhare śubhe || 21||**

मेरुपर्वतसंकाशं निर्मितं विश्वकर्मणा ।

**meruparvatasaṁkāśaṁ nirmitaṁ viśvakarmaṇā |**

त्वरिताख्येन रुद्रेण रौद्रेण च जनार्दनः ॥ २२ ॥

**tvaritākhyena rudreṇa raudreṇa ca janārdanaḥ || 22||**

स्नाप्य सम्पूज्य गन्धाद्यैर्ज्वालाकारं मनोरमम् ।

**snāpya sampūjya gandhādyairjvālākāraṁ manoramam |**

तुष्टाव च तदा रुद्रं सम्पूज्याग्नौ प्रणम्य च ॥ २३ ॥

**tuṣṭāva ca tadā rudraṁ sampūjyāgnau praṇamya ca || 23||**

देवं नाम्नां सहस्रेण भवाद्येन यथाक्रमम् ।

**devaṁ nāmnāṁ sahasreṇa bhavādyena yathākramam |**

पूजयामास च शिवं प्रणवाद्यं नमोन्तकम् ॥ २४ ॥

**pūjayāmāsa ca śivaṁ praṇavādyaṁ namontakam || 24||**

देवं नाम्नां सहस्रेण भवाद्येन महेश्वरम् ।

**devaṁ nāmnāṁ sahasreṇa bhavādyena maheśvaram |**

प्रतिनाम सपद्मेन पूजयामास शङ्करम् ॥ २५ ॥

**pratināma sapadmena pūjayāmāsa śaṅkaram || 25||**

अग्नौ च नामभिर्देवं भवाद्यैः समिदादिभिः ।

**agnau ca nāmabhirdevaṁ bhavādyaiḥ samidādibhiḥ |**

स्वाहान्तैर्विधिवद्धुत्वा प्रत्येकमयुतं प्रभुम् ॥ २६ ॥

**svāhāntairvidhivaddhutvā pratyekamayutaṁ prabhum || 26||**

तुष्टाव च पुनः शम्भुं भवाद्यैर्भवमीश्वरम् ।

**tuṣṭāva ca punaḥ śambhuṁ bhavādyairbhavamīśvaram |**

❀❀❀

## श्री विष्णुरुवाच –

**śrī viṣṇuruvāca -**

भवः शिवो हरो रुद्रः पुरुषः पद्मलोचनः ॥ २७ ॥

**bhavaḥ śivo haro rudraḥ puruṣaḥ padmalocanaḥ ||27||**

अर्थितव्यः सदाचारः सर्वशम्भुर्महेश्वरः ।

**arthitavyaḥ sadācāraḥ sarvaśambhurmaheśvaraḥ |**

ईश्वरः स्थाणुरीशानः सहस्राक्षः सहस्रपात् ॥ २८ ॥

**īśvaraḥ sthāṇurīśānaḥ sahasrākṣaḥ sahasrapāt ||28||**

वरीयान् वरदो वन्द्यः शङ्करः परमेश्वरः ।

**varīyān varado vandyaḥ śaṅkaraḥ parameśvaraḥ |**

गङ्गाधरः शूलधरः परार्थैकप्रयोजनः ॥ २९ ॥

**gaṅgādharaḥ śūladharaḥ parārthaikaprayojanaḥ ||29||**

सर्वज्ञः सर्वदेवादिगिरिधन्वा जटाधरः ।

**sarvajñaḥ sarvadevādigiridhanvā jaṭādharaḥ |**

चन्द्रापीडश्चन्द्रमौलिर्विद्वान्विश्वामरेश्वरः ॥ ३० ॥

**candrāpīḍaścandramaulirvidvānviśvāmareśvaraḥ ||30||**

वेदान्तसारसन्दोहः कपाली नीललोहितः ।

**vedāntasārasandohaḥ kapālī nīlalohitaḥ |**

ध्यानाधारोऽपरिच्छेद्यो गौरीभर्ता गणेश्वरः ॥ ३१ ॥

**dhyānādhāro'paricchedyo gaurībhartā gaṇeśvaraḥ ||31||**

अष्टमूर्तिर्विश्वमूर्तिस्त्रिवर्गः स्वर्गसाधनः ।

**aṣṭamūrtirviśvamūrtistrivargaḥ svargasādhanaḥ ।**

ज्ञानगम्यो दृढप्रज्ञो देवदेवस्त्रिलोचनः ॥ ३२ ॥

**jñānagamyo dṛḍhaprajño devadevastrilocanaḥ ।। 32।।**

वामदेवो महादेवः पाण्डुः परिदृढो दृढः ।

**vāmadevo mahādevaḥ pāṇḍuḥ paridṛḍho dṛḍhaḥ ।**

विश्वरूपो विरूपाक्षो वागीशः शुचिरन्तरः ॥ ३३ ॥

**viśvarūpo virūpākṣo vāgīśaḥ śucirantaraḥ ।। 33।।**

सर्वप्रणयसंवादीवृषाङ्को वृषवाहनः ।

**sarvapraṇayasaṁvādīvṛṣāṅko vṛṣavāhanaḥ ।**

ईशः पिनाकी खट्वाङ्गी चित्रवेषश्चिरन्तनः ॥ ३४ ॥

**īśaḥ pinākī khaṭvāṅgī citraveṣaścirantanaḥ ।। 34।।**

तमोहरो महायोगी गोप्ता ब्रह्माङ्गहृज्जटी ।

**tamoharo mahāyogī goptā brahmāṅgahṛjjaṭī ।**

कालकालः कृत्तिवासाः सुभगः प्रणवात्मकः ॥ ३५ ॥

**kālakālaḥ kṛttivāsāḥ subhagaḥ praṇavātmakaḥ ।। 35।।**

उन्मत्तवेषश्चक्षुष्योदुर्वासाः स्मरशासनः ।

**unmattaveṣaścakṣuṣyodurvāsāḥ smaraśāsanaḥ ।**

दृढायुधः स्कन्दगुरुः परमेष्ठी परायणः ॥ ३६ ॥

**dṛḍhāyudhaḥ skandaguruḥ parameṣṭhī parāyaṇaḥ ।। 36।।**

अनादिमध्यनिधनो गिरिशो गिरिबान्धवः ।

**anādimadhyanidhano giriśo giribāndhavaḥ |**

कुबेरबन्धुः श्रीकण्ठो लोकवर्णोत्तमोत्तमः ॥ ३७ ॥

**kuberabandhuḥ śrīkaṇṭho lokavarṇottamottamaḥ || 37||**

सामान्यदेवः कोदण्डी नीलकण्ठः परश्वधी ।

**sāmānyadevaḥ kodaṇḍī nīlakaṇṭhaḥ paraśvadhī |**

विशालाक्षो मृगव्याधः सुरेशः सूर्यतापनः ॥ ३८ ॥

**viśālākṣo mṛgavyādhaḥ sureśaḥ sūryatāpanaḥ || 38||**

धर्मकर्माक्षमः क्षेत्रं भगवान् भगनेत्रभित् ।

**dharmakarmākṣamaḥ kṣetraṁ bhagavān bhaganetrabhit |**

उग्रः पशुपतिस्तार्क्ष्यप्रियभक्तः प्रियंवदः ॥ ३९ ॥

**ugraḥ paśupatistārkṣyapriyabhaktaḥ priyaṁvadaḥ || 39||**

दाता दयाकरो दक्षः कपर्दी कामशासनः ।

**dātā dayākaro dakṣaḥ kapardī kāmaśāsanaḥ |**

श्मशाननिलयः सूक्ष्मः श्मशानस्थो महेश्वरः ॥ ४० ॥

**śmaśānanilayaḥ sūkṣmaḥ śmaśānastho maheśvaraḥ || 40||**

लोककर्ता भूतपतिर्महाकर्ता महौषधी ।

**lokakartā bhūtapatirmahākartā mahauṣadhī |**

उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः ॥ ४१ ॥

**uttaro gopatirgoptā jñānagamyaḥ purātanaḥ || 41||**

नीतिः सुनीतिः शुद्धात्मा सोमसोमरतः सुखी ।

**nītiḥ sunītiḥ śuddhātmā somasomarataḥ sukhī |**

सोमपोऽमृतपः सोमो महानीतिर्महामतिः ॥ ४२ ॥

**somapo'mṛtapaḥ somo mahānītirmahāmatiḥ || 42||**

अजातशत्रुरालोकः सम्भाव्यो हव्यवाहनः ।

**ajātaśatrurālokaḥ sambhāvyo havyavāhanaḥ |**

लोककारो वेदकारः सूत्रकारः सनातनः ॥ ४३ ॥

**lokakāro vedakāraḥ sūtrakāraḥ sanātanaḥ || 43||**

महर्षिः कपिलाचार्यो विश्वदीप्तिस्त्रिलोचनः ।

**maharṣiḥ kapilācāryo viśvadīptistrilocanaḥ |**

पिनाकपाणिभूदेवः स्वस्तिदः स्वस्तिकृत्सदा ॥ ४४ ॥

**pinākapāṇibhūdevaḥ svastidaḥ svastikṛtsadā || 44||**

त्रिधामा सौभगः शर्वः सर्वज्ञः सर्वगोचरः ।

**tridhāmā saubhagaḥ śarvaḥ sarvajñaḥ sarvagocaraḥ |**

ब्रह्मधृग्विश्वसृक्स्वर्गः कर्णिकारः प्रियः कविः ॥ ४५ ॥

**brahmadhṛgviśvasṛksvargaḥ karṇikāraḥ priyaḥ kaviḥ || 45||**

शाखो विशाखो गोशाखः शिवो नैकः क्रतुः समः ।

**śākho viśākho gośākhaḥ śivo naikaḥ kratuḥ samaḥ |**

गङ्गाप्लवोदको भावः सकलस्थपतिस्थिरः ॥ ४६ ॥

**gaṅgāplavodako bhāvaḥ sakalasthapatisthiraḥ || 46||**

विजितात्मा विधेयात्मा भूतवाहनसारथिः ।

**vijitātmā vidheyātmā bhūtavāhanasārathiḥ |**

सगणो गणकार्यश्च सुकीर्तिश्छिन्नसंशयः ॥ ४७ ॥

**sagaṇo gaṇakāryaśca sukīrtiśchinnasaṁśayaḥ || 47||**

कामदेवः कामपालो भस्मोद्धूलितविग्रहः ।

**kāmadevaḥ kāmapālo bhasmoddhūlitavigrahaḥ |**

भस्मप्रियो भस्मशायी कामी कान्तः कृतागमः ॥ ४८ ॥

**bhasmapriyo bhasmaśāyī kāmī kāntaḥ kṛtāgamaḥ || 48||**

समायुक्तो निवृत्तात्मा धर्मयुक्तः सदाशिवः ।

**samāyukto nivṛttātmā dharmayuktaḥ sadāśivaḥ |**

चतुर्मुखश्चतुर्बाहुर्दुरावासो दुरासदः ॥ ४९ ॥

**caturmukhaścaturbāhurdurāvāso durāsadaḥ || 49||**

दुर्गमो दुर्लभो दुर्गः सर्वायुधविशारदः ।

**durgamo durlabho durgaḥ sarvāyudhaviśāradaḥ |**

अध्यात्मयोगनिलयः सुतन्तुस्तन्तुवर्धनः ॥ ५० ॥

**adhyātmayoganilayaḥ sutantustantuvardhanaḥ || 50||**

शुभाङ्गो लोकसारङ्गो जगदीशोऽमृताशनः ।

**śubhāṅgo lokasāraṅgo jagadīśo'mṛtāśanaḥ |**

भस्मशुद्धिकरो मेरुरोजस्वी शुद्धविग्रहः ॥ ५१ ॥

**bhasmaśuddhikaro merurojasvī śuddhavigrahaḥ || 51||**

हिरण्यरेतास्तरणिर्मरीचिर्महिमालयः ।

**hiraṇyaretāstaraṇirmarīcirmahimālayaḥ ।**

महाह्रदो महागर्भः सिद्धवृन्दारवन्दितः ॥ ५२ ॥

**mahāhrado mahāgarbhaḥ siddhavṛndāravanditaḥ ।। 52।।**

व्याघ्रचर्मधरो व्याली महाभूतो महानिधिः ।

**vyāghracarmadharo vyālī mahābhūto mahānidhiḥ ।**

अमृताङ्गोऽमृतवपुः पञ्चयज्ञः प्रभञ्जनः ॥ ५३ ॥

**amṛtāṅgo'mṛtavapuḥ pañcayajñaḥ prabhañjanaḥ ।। 53।।**

पञ्चविंशतितत्त्वज्ञः पारिजातः परावरः ।

**pañcaviṁśatitattvajñaḥ pārijātaḥ parāvaraḥ ।**

सुलभः सुव्रतः शूरो वाङ्मयैकनिधिर्निधिः ॥ ५४ ॥

**sulabhaḥ suvrataḥ śūro vāṅmayaikanidhirnidhiḥ ।। 54।।**

वर्णाश्रमगुरुर्वर्णी शत्रुजिच्छत्रुतापनः ।

**varṇāśramagururvarṇī śatrujicchatrutāpanaḥ ।**

आश्रमः क्षपणः क्षामो ज्ञानवानचलाचलः ॥ ५५ ॥

**āśramaḥ kṣapaṇaḥ kṣāmo jñānavānacalācalaḥ ।। 55।।**

प्रमाणभूतो दुर्ज्ञेयः सुपर्णो वायुवाहनः ।

**pramāṇabhūto durjñeyaḥ suparṇo vāyuvāhanaḥ ।**

धनुर्धरो धनुर्वेदो गुणराशिर्गुणाकरः ॥ ५६ ॥

**dhanurdharo dhanurvedo guṇarāśirguṇākaraḥ ।। 56।।**

अनन्तदृष्टिरानन्दो दण्डो दमयिता दमः ।

**anantadr̥ṣṭirānando daṇḍo damayitā damaḥ ।**

अभिवाद्यो महाचार्यो विश्वकर्मा विशारदः ॥ ५७ ॥

**abhivādyo mahācāryo viśvakarmā viśāradaḥ ।। 57।।**

वीतरागो विनीतात्मा तपस्वी भूतभावनः ।

**vītarāgo vinītātmā tapasvī bhūtabhāvanaḥ ।**

उन्मत्तवेषः प्रच्छन्नो जितकामो जितप्रियः ॥ ५८ ॥

**unmattaveṣaḥ pracchanno jitakāmo jitapriyaḥ ।। 58।।**

कल्याणप्रकृतिः कल्पः सर्वलोकप्रजापतिः ।

**kalyāṇaprakr̥tiḥ kalpaḥ sarvalokaprajāpatiḥ ।**

तपस्वी तारको धीमान् प्रधानप्रभुरव्ययः ॥ ५९ ॥

**tapasvī tārako dhīmān pradhānaprabhuravyayaḥ ।। 59।।**

लोकपालोऽन्तर्हितात्मा कल्यादिः कमलेक्षणः ।

**lokapālo'ntarhitātmā kalyādiḥ kamalekṣaṇaḥ ।**

वेदशास्त्रार्थतत्त्वज्ञो नियमो नियमाश्रयः ॥ ६० ॥

**vedaśāstrārthatattvajño niyamo niyamāśrayaḥ ।। 60।।**

चन्द्रः सूर्यः शनिः केतुर्विरामो विद्रुमच्छविः ।

**candraḥ sūryaḥ śaniḥ keturvirāmo vidrumacchaviḥ ।**

भक्तिगम्यः परं ब्रह्म मृगबाणार्पणोऽनघः ॥ ६१ ॥

**bhaktigamyaḥ paraṁ brahma mr̥gabāṇārpaṇo'naghaḥ ।। 61।।**

अद्रिराजालयः कान्तः परमात्मा जगद्गुरुः ।

**adrirājālayaḥ kāntaḥ paramātmā jagadguruḥ ।**

सर्वकर्माचलस्त्वष्टा माङ्गल्यो मङ्गलावृतः ॥ ६२ ॥

**sarvakarmācalastvaṣṭā māṅgalyo maṅgalāvṛtaḥ ।। 62।।**

महातपा दीर्घतपाः स्थविष्ठः स्थविरो ध्रुवः ।

**mahātapā dīrghatapāḥ sthaviṣṭhaḥ sthaviro dhruvaḥ ।**

अहः संवत्सरो व्याप्तिः प्रमाणं परमं तपः ॥ ६३ ॥

**ahaḥ saṁvatsaro vyāptiḥ pramāṇaṁ paramaṁ tapaḥ ।। 63।।**

संवत्सरकरो मन्त्रः प्रत्ययः सर्वदर्शनः ।

**saṁvatsarakaro mantraḥ pratyayaḥ sarvadarśanaḥ ।**

अजः सर्वेश्वरः स्निग्धो महारेता महाबलः ॥ ६४ ॥

**ajaḥ sarveśvaraḥ snigdho mahāretā mahābalaḥ ।। 64।।**

योगी योग्यो महारेताः सिद्धः सर्वादिरग्निदः ।

**yogī yogyo mahāretāḥ siddhaḥ sarvādiragnidaḥ ।**

वसुर्वसुमनाः सत्यः सर्वपापहरो हरः ॥ ६५ ॥

**vasurvasumanāḥ satyaḥ sarvapāpaharo haraḥ ।। 65।।**

अमृतः शाश्वतः शान्तो बाणहस्तः प्रतापवान् ।

**amṛtaḥ śāśvataḥ śānto bāṇahastaḥ pratāpavān ।**

कमण्डलुधरो धन्वी वेदाङ्गो वेदविन्मुनिः ॥ ६६ ॥

**kamaṇḍaludharo dhanvī vedāṅgo vedavinmuniḥ ।। 66।।**

भ्राजिष्णुर्भोजनं भोक्ता लोकनेता दुराधरः ।
**bhrājiṣṇurbhojanaṁ bhoktā lokanetā durādharaḥ ।**
अतीन्द्रियो महामायः सर्वावासश्चतुष्पथः ॥ ६७ ॥
**atīndriyo mahāmāyaḥ sarvāvāsaścatuṣpathaḥ ।। 67।।**

कालयोगी महानादो महोत्साहो महाबलः ।
**kālayogī mahānādo mahotsāho mahābalaḥ ।**
महाबुद्धिर्महावीर्यो भूतचारी पुरंदरः ॥ ६८ ॥
**mahābuddhirmahāvīryo bhūtacārī puraṁdaraḥ ।। 68।।**

निशाचरः प्रेतचारी महाशक्तिर्महाद्युतिः ।
**niśācaraḥ pretacārī mahāśaktirmahādyutiḥ ।**
अनिर्देश्यवपुः श्रीमान्सर्वहार्यमितो गतिः ॥ ६९ ॥
**anirdeśyavapuḥ śrīmānsarvahāryamito gatiḥ ।। 69।।**

बहुश्रुतो बहुमयो नियतात्मा भवोद्भवः ।
**bahuśruto bahumayo niyatātmā bhavodbhavaḥ ।**
ओजस्तेजो द्युतिकरो नर्तकः सर्वकामकः ॥ ७० ॥
**ojastejo dyutikaro nartakaḥ sarvakāmakaḥ ।। 70।।**

नृत्यप्रियो नृत्यनृत्यः प्रकाशात्मा प्रतापनः ।
**nṛtyapriyo nṛtyanṛtyaḥ prakāśātmā pratāpanaḥ ।**
बुद्धः स्पष्टाक्षरो मन्त्रः सन्मानः सारसम्प्लवः ॥ ७१ ॥
**buddhaḥ spaṣṭākṣaro mantraḥ sanmānaḥ sārasamplavaḥ ।। 71।।**

युगादिकृद्युगावर्तो गम्भीरो वृषवाहनः ।
**yugādikṛdyugāvarto gambhīro vṛṣavāhanaḥ |**
इष्टो विशिष्टः शिष्टेष्टः शरभः शरभो धनुः ॥ ७२ ॥
**iṣṭo viśiṣṭaḥ śiṣṭeṣṭaḥ śarabhaḥ śarabho dhanuḥ || 72||**

अपांनिधिरधिष्ठानं विजयो जयकालवित् ।
**apāṁnidhiradhiṣṭhānaṁ vijayo jayakālavit |**
प्रतिष्ठितः प्रमाणज्ञो हिरण्यकवचो हरिः ॥ ७३ ॥
**pratiṣṭhitaḥ pramāṇajño hiraṇyakavaco hariḥ || 73||**

विरोचनः सुरगणो विद्येशो विबुधाश्रयः ।
**virocanaḥ suragaṇo vidyeśo vibudhāśrayaḥ |**
बालरूपो बलोन्माथी विवर्तो गहनो गुरुः ॥ ७४ ॥
**bālarūpo balonmāthī vivarto gahano guruḥ || 74||**

करणं कारणं कर्ता सर्वबन्धविमोचनः ।
**karaṇaṁ kāraṇaṁ kartā sarvabandhavimocanaḥ |**
विद्वत्तमो वीतभयो विश्वभर्ता निशाकरः ॥ ७५ ॥
**vidvattamo vītabhayo viśvabhartā niśākaraḥ || 75||**

व्यवसायो व्यवस्थानः स्थानदो जगदादिजः ।
**vyavasāyo vyavasthānaḥ sthānado jagadādijaḥ |**
दुन्दुभो ललितो विश्वो भवात्मात्मनिसंस्थितः ॥ ७६ ॥
**dundubho lalito viśvo bhavātmātmanisaṁsthitaḥ || 76||**

वीरेश्वरो वीरभद्रो वीरहा वीरभृद्विराट् ।

**vīreśvaro vīrabhadro vīrahā vīrabhṛdvirāṭ |**

वीरचूडामणिर्वेत्ता तीव्रनादो नदीधरः ॥ ७७ ॥

**vīracūḍāmaṇirvettā tīvranādo nadīdharaḥ || 77||**

आज्ञाधारस्त्रिशूली च शिपिविष्टः शिवालयः ।

**ājñādhārastriśūlī ca śipiviṣṭaḥ śivālayaḥ |**

वालखिल्यो महाचापस्तिग्मांशुर्निधिरव्ययः ॥ ७८ ॥

**vālakhilyo mahācāpastigmāṁśurnidhiravyayaḥ || 78||**

अभिरामः सुशरणः सुब्रह्मण्यः सुधापतिः ।

**abhirāmaḥ suśaraṇaḥ subrahmaṇyaḥ sudhāpatiḥ |**

मघवान्कौशिको गोमान् विश्रामः सर्वशासनः ॥ ७९ ॥

**maghavānkauśiko gomān viśrāmaḥ sarvaśāsanaḥ || 79||**

ललाटाक्षो विश्वदेहः सारः संसारचक्रभृत् ।

**lalāṭākṣo viśvadehaḥ sāraḥ saṁsāracakrabhṛt |**

अमोघदण्डी मध्यस्थो हिरण्यो ब्रह्मवर्चसी ॥ ८० ॥

**amoghadaṇḍī madhyastho hiraṇyo brahmavarcasī || 80||**

परमार्थः परमयः शम्बरो व्याघ्रकोऽनलः ।

**paramārthaḥ paramayaḥ śambaro vyāghrako'nalaḥ |**

रुचिर्वररुचिर्वन्द्यो वाचस्पतिरहर्पतिः ॥ ८१ ॥

**rucirvararucirvandyo vācaspatiraharpatiḥ || 81||**

रविर्विरोचनः स्कन्धः शास्ता वैवस्वतो जनः ।

**ravirvirocanaḥ skandhaḥ śāstā vaivasvato janaḥ |**

युक्तिरुन्नतकीर्तिश्च शान्तरागः पराजयः ॥ ८२ ॥

**yuktirunnatakīrtiśca śāntarāgaḥ parājayaḥ || 82||**

कैलासपतिकामारिः सविता रविलोचनः ।

**kailāsapatikāmāriḥ savitā ravilocanaḥ |**

विद्वत्तमो वीतभयो विश्वहर्ताऽनिवारितः ॥ ८३ ॥

**vidvattamo vītabhayo viśvahartā'nivāritaḥ || 83||**

नित्यो नियतकल्याणः पुण्यश्रवणकीर्तनः ।

**nityo niyatakalyāṇaḥ puṇyaśravaṇakīrtanaḥ |**

दूरश्रवा विश्वसहो ध्येयो दुःस्वप्ननाशनः ॥ ८४ ॥

**dūraśravā viśvasaho dhyeyo duḥsvapnanāśanaḥ || 84||**

उत्तारको दुष्कृतिहा दुर्धर्षो दुःसहोऽभयः ।

**uttārako duṣkṛtihā durdharṣo duḥsaho'bhayaḥ |**

अनादिर्भूर्भुवो लक्ष्मीः किरीटित्रिदशाधिपः ॥ ८५ ॥

**anādirbhūrbhuvo lakṣmīḥ kirīṭitridaśādhipaḥ || 85||**

विश्वगोप्ता विश्वभर्ता सुधीरो रुचिराङ्गदः ।

**viśvagoptā viśvabhartā sudhīro rucirāṅgadaḥ |**

जननो जनजन्मादिः प्रीतिमान्नीतिमान्नयः ॥ ८६ ॥

**janano janajanmādiḥ prītimānnītimānnayaḥ || 86||**

विशिष्टः काश्यपो भानुर्भीमो भीमपराक्रमः ।

**viśiṣṭaḥ kāśyapo bhānurbhīmo bhīmaparākramaḥ ।**

प्रणवः सप्तधाचारो महाकायो महाधनुः ॥ ८७ ॥

**praṇavaḥ saptadhācāro mahākāyo mahādhanuḥ ।। 87।।**

जन्माधिपो महादेवः सकलागमपारगः ।

**janmādhipo mahādevaḥ sakalāgamapāragaḥ ।**

तत्त्वातत्त्वविवेकात्मा विभूष्णुर्भूतिभूषणः ॥ ८८ ॥

**tattvātattvavivekātmā vibhūṣṇurbhūtibhūṣaṇaḥ ।। 88।।**

ऋषिर्ब्राह्मणविज्जिष्णुर्जन्ममृत्युजरातिगः ।

**ṛṣirbrāhmaṇavijjiṣṇurjanmamṛtyujarātigaḥ ।**

यज्ञो यज्ञपतिर्यज्वा यज्ञान्तोऽमोघविक्रमः ॥ ८९ ॥

**yajño yajñapatiryajvā yajñānto'moghavikramaḥ ।। 89।।**

महेन्द्रो दुर्भरः सेनी यज्ञाङ्गो यज्ञवाहनः ।

**mahendro durbharaḥ senī yajñāṅgo yajñavāhanaḥ ।**

पञ्चब्रह्मसमुत्पत्तिर्विश्वेशो विमलोदयः ॥ ९० ॥

**pañcabrahmasamutpattirviśveśo vimalodayaḥ ।। 90।।**

आत्मयोनिरनाद्यन्तो षड्विंशत्सप्तलोकधृक् ।

**ātmayoniranādyanto ṣaḍviṁśatsaptalokadhṛk ।**

गायत्रीवल्लभः प्रांशुर्विश्वावासः प्रभाकरः ॥ ९१ ॥

**gāyatrīvallabhaḥ prāṁśurviśvāvāsaḥ prabhākaraḥ ।। 91।।**

शिशुर्गिरिरतः सम्राट् सुषेणः सुरशत्रुहा ।

**śiśurgiriratаḥ samrāṭ suṣeṇaḥ suraśatruhā |**

अमोघोऽरिष्टमथनो मुकुन्दो विगतज्वरः ॥ ९२ ॥

**amogho'riṣṭamathano mukundo vigatajvaraḥ || 92||**

स्वयंज्योतिरनुज्योतिरात्मज्योतिरचञ्चलः ।

**svayaṁjyotiranujyotirātmajyotiracañcalaḥ |**

पिङ्गलः कपिलश्मश्रुः शास्त्रनेत्रस्त्रयीतनुः ॥ ९३ ॥

**piṅgalaḥ kapilaśmaśruḥ śāstranetrastrayītanuḥ || 93||**

ज्ञानस्कन्धो महाज्ञानी निरुत्पत्तिरुपप्लवः ।

**jñānaskandho mahājñānī nirutpattirupaplavaḥ |**

भगो विवस्वानादित्यो योगाचार्यो बृहस्पतिः ॥ ९४ ॥

**bhago vivasvānādityo yogācāryo bṛhaspatiḥ || 94||**

उदारकीर्तिरुद्योगी सद्योगीसदसन्मयः ।

**udārakīrtirudyogī sadyogīsadasanmayaḥ |**

नक्षत्रमाली राकेशः साधिष्ठानः षडाश्रयः ॥ ९५ ॥

**nakṣatramālī rākeśaḥ sādhiṣṭhānaḥ ṣaḍāśrayaḥ || 95||**

पवित्रपाणिः पापारिर्मणिपूरो मनोगतिः ।

**pavitrapāṇiḥ pāpārirmaṇipūro manogatiḥ |**

हृत्पुण्डरीकमासीनः शुक्लः शान्तो वृषाकपिः ॥ ९६ ॥

**hṛtpuṇḍarīkamāsīnaḥ śuklaḥ śānto vṛṣākapiḥ || 96||**

विष्णुर्ग्रहपतिः कृष्णः समर्थोऽनर्थनाशनः ।

**viṣṇurgrahapatiḥ kṛṣṇaḥ samartho'narthanāśanaḥ ।**

अधर्मशत्रुरक्षय्यः पुरुहूतः पुरुष्टुतः ॥ ९७ ॥

**adharmaśatrurakṣayyaḥ puruhūtaḥ puruṣṭutaḥ ।। 97।।**

ब्रह्मगर्भो बृहद्गर्भो धर्मधेनुर्धनागमः ।

**brahmagarbho bṛhadgarbho dharmadhenurdhanāgamaḥ ।**

जगद्धितैषिसुगतः कुमारः कुशलागमः ॥ ९८ ॥

**jagaddhitaiṣisugataḥ kumāraḥ kuśalāgamaḥ ।। 98।।**

हिरण्यवर्णो ज्योतिष्मान्नानाभूतधरो ध्वनिः ।

**hiraṇyavarṇo jyotiṣmānnānābhūtadharo dhvaniḥ ।**

अरोगो नियमाध्यक्षो विश्वामित्रो द्विजोत्तमः ॥ ९९ ॥

**arogo niyamādhyakṣo viśvāmitro dvijottamaḥ ।। 99।।**

बृहज्योतिः सुधामा च महाज्योतिरनुत्तमः ।

**bṛhajyotiḥ sudhāmā ca mahājyotiranuttamaḥ ।**

मातामहो मातरिश्वा नभस्वान्नागहारधृक् ॥ १०० ॥

**mātāmaho mātariśvā nabhasvānnāgahāradhṛk ।। 100।।**

पुलस्त्यः पुलहोऽगस्त्यो जातूकर्ण्यः पराशरः ।

**pulastyaḥ pulaho'gastyo jātūkarṇyaḥ parāśaraḥ ।**

निरावरणधर्मज्ञो विरिञ्चो विष्टरश्रवाः ॥ १०१ ॥

**nirāvaraṇadharmajño viriñco viṣṭaraśravāḥ ।। 101।।**

आत्मभूरनिरुद्धोऽत्रि ज्ञानमूर्तिर्महायशाः ।

ātmabhūraniruddho'tri jñānamūrtirmahāyaśāḥ ।

लोकचूडामणिर्वीरश्चण्डसत्यपराक्रमः ॥ १०२ ॥

lokacūḍāmaṇirvīraścaṇḍasatyaparākramaḥ ।। 102।।

व्यालकल्पो महाकल्पो महावृक्षः कलाधरः ।

vyālakalpo mahākalpo mahāvṛkṣaḥ kalādharaḥ ।

अलंकरिष्णुस्त्वचलो रोचिष्णुर्विक्रमोत्तमः ॥ १०३ ॥

alaṁkariṣṇustvacalo rociṣṇurvikramottamaḥ ।। 103।।

आशुशब्दपतिर्वेगी प्लवनः शिखिसारथिः ।

āśuśabdapatirvegī plavanaḥ śikhisārathiḥ ।

असंसृष्टोऽतिथिः शक्रः प्रमाथी पापनाशनः ॥ १०४ ॥

asaṁsṛṣṭo'tithiḥ śakraḥ pramāthī pāpanāśanaḥ ।। 104।।

वसुश्रवाः कव्यवाहः प्रतप्तो विश्वभोजनः ।

vasuśravāḥ kavyavāhaḥ pratapto viśvabhojanaḥ ।

जर्यो जराधिशमनो लोहितश्च तनूनपात् ॥ १०५ ॥

jaryo jarādhiśamano lohitaśca tanūnapāt ।। 105।।

पृषदश्वो नभोयोनिः सुप्रतीकस्तमिस्रहा ।

pṛṣadaśvo nabhoyoniḥ supratīkastamisrahā ।

निदाघस्तपनो मेघः पक्षः परपुरञ्जयः ॥ १०६ ॥

nidāghastapano meghaḥ pakṣaḥ parapurañjayaḥ ।। 106।।

मुखानिलः सुनिष्पन्नः सुरभिः शिशिरात्मकः ।
**mukhānilaḥ suniṣpannaḥ surabhiḥ śiśirātmakaḥ ।**
वसन्तो माधवो ग्रीष्मो नभस्यो बीजवाहनः ॥ १०७ ॥
**vasanto mādhavo grīṣmo nabhasyo bījavāhanaḥ ।। 107।।**

अङ्गिरामुनिरात्रेयो विमलो विश्ववाहनः ।
**aṅgirāmunirātreyo vimalo viśvavāhanaḥ ।**
पावनः पुरुजिच्छक्रस्त्रिविद्यो नरवाहनः ॥ १०८ ॥
**pāvanaḥ purujicchakrastrividyo naravāhanaḥ ।। 108।।**

मनो बुद्धिरहंकारः क्षेत्रज्ञः क्षेत्रपालकः ।
**mano buddhirahaṁkāraḥ kṣetrajñaḥ kṣetrapālakaḥ ।**
तेजोनिधिर्ज्ञाननिधिर्विपाको विघ्नकारकः ॥ १०९ ॥
**tejonidhirjñānanidhirvipāko vighnakārakaḥ ।। 109।।**

अधरोऽनुत्तरो ज्ञेयो ज्येष्ठो निःश्रेयसालयः ।
**adharo'nuttaro jñeyo jyeṣṭho niḥśreyasālayaḥ ।**
शैलो नगस्तनुर्दोहो दानवारिररिन्दमः ॥ ११० ॥
**śailo nagastanurdoho dānavārirarindamaḥ ।। 110।।**

चारुधीर्जनकश्चारु विशल्यो लोकशल्यकृत् ।
**cārudhīrjanakaścāru viśalyo lokaśalyakṛt ।**
चतुर्वेदश्चतुर्भावश्चतुरश्चतुरप्रियः ॥ १११ ॥
**caturvedaścaturbhāvaścaturaścaturapriyaḥ ।। 111।।**

आम्नायोऽथ समाम्नायस्तीर्थदेवशिवालयः ।

**āmnāyo'tha samāmnāyastīrthadevaśivālayaḥ ।**

बहुरूपो महारूपः सर्वरूपश्चराचरः ॥ ११२ ॥

**bahurūpo mahārūpaḥ sarvarūpaścarācaraḥ ।। 112।।**

न्यायनिर्वाहको न्यायो न्यायगम्यो निरञ्जनः ।

**nyāyanirvāhako nyāyo nyāyagamyo nirañjanaḥ ।**

सहस्रमूर्धा देवेन्द्रः सर्वशस्त्रप्रभञ्जनः ॥ ११३ ॥

**sahasramūrdhā devendraḥ sarvaśastraprabhañjanaḥ ।। 113।।**

मुण्डो विरूपो विकृतो दण्डी दान्तो गुणोत्तमः ।

**muṇḍo virūpo vikṛto daṇḍī dānto guṇottamaḥ ।**

पिङ्गलाक्षोऽथ हर्यक्षो नीलग्रीवो निरामयः ॥ ११४ ॥

**piṅgalākṣo'tha haryakṣo nīlagrīvo nirāmayaḥ ।। 114।।**

सहस्रबाहुः सर्वेशः शरण्यः सर्वलोकभृत् ।

**sahasrabāhuḥ sarveśaḥ śaraṇyaḥ sarvalokabhṛt ।**

पद्मासनः परंज्योतिः परावरफलप्रदः ॥ ११५ ॥

**padmāsanaḥ paraṁjyotiḥ parāvaraphalapradaḥ ।। 115।।**

पद्मगर्भो महागर्भो विश्वगर्भो विचक्षणः ।

**padmagarbho mahāgarbho viśvagarbho vicakṣaṇaḥ ।**

परावरज्ञो बीजेशः सुमुखः सुमहास्वनः ॥ ११६ ॥

**parāvarajño bījeśaḥ sumukhaḥ sumahāsvanaḥ ।। 116।।**

देवासुरगुरुर्देवो देवासुरनमस्कृतः ।
**devāsuragururdevo devāsuranamaskṛtaḥ |**
देवासुरमहामात्रो देवासुरमहाश्रयः ॥ ११७ ॥
**devāsuramahāmātro devāsuramahāśrayaḥ || 117||**

देवादिदेवो देवर्षिर्देवासुरवरप्रदः ।
**devādidevo devarṣirdevāsuravarapradaḥ |**
देवासुरेश्वरो दिव्यो देवासुरमहेश्वरः ॥ ११८ ॥
**devāsureśvaro divyo devāsuramaheśvaraḥ || 118||**

सर्वदेवमयोऽचिन्त्यो देवतात्मात्मसम्भवः ।
**sarvadevamayo'cintyo devatātmātmasambhavaḥ |**
ईड्योऽनीशः सुरव्याघ्रो देवसिंहो दिवाकरः ॥ ११९ ॥
**īḍyo'nīśaḥ suravyāghro devasiṁho divākaraḥ || 119||**

विबुधाग्रवरश्रेष्ठः सर्वदेवोत्तमोत्तमः ।
**vibudhāgravaraśreṣṭhaḥ sarvadevottamottamaḥ |**
शिवज्ञानरतः श्रीमान् शिखिश्रीपर्वतप्रियः ॥ १२० ॥
**śivajñānarataḥ śrīmān śikhiśrīparvatapriyaḥ || 120||**

जयस्तम्भो विशिष्टम्भो नरसिंहनिपातनः ।
**jayastambho viśiṣṭambho narasiṁhanipātanaḥ |**
ब्रह्मचारी लोकचारी धर्मचारी धनाधिपः ॥ १२१ ॥
**brahmacārī lokacārī dharmacārī dhanādhipaḥ || 121||**

नन्दी नन्दीश्वरो नग्नो नग्नव्रतधरः शुचिः ।

**nandī nandīśvaro nagno nagnavratadharaḥ śuciḥ |**

लिङ्गाध्यक्षः सुराध्यक्षो युगाध्यक्षो युगावहः ॥ १२२ ॥

**liṅgādhyakṣaḥ surādhyakṣo yugādhyakṣo yugāvahaḥ || 122||**

स्ववशः सवशः स्वर्गः स्वरः स्वरमयः स्वनः ।

**svavaśaḥ savaśaḥ svargaḥ svaraḥ svaramayaḥ svanaḥ |**

बीजाध्यक्षो बीजकर्ता धनकृद्धर्मवर्धनः ॥ १२३ ॥

**bījādhyakṣo bījakartā dhanakṛddharmavardhanaḥ || 123||**

दम्भोऽदम्भो महादम्भः सर्वभूतमहेश्वरः ।

**dambho'dambho mahādambhaḥ sarvabhūtamaheśvaraḥ |**

श्मशाननिलयस्तिष्यः सेतुरप्रतिमाकृतिः ॥ १२४ ॥

**śmaśānanilayastiṣyaḥ seturapratimākṛtiḥ || 124||**

लोकोत्तरस्फुटालोकस्त्र्यम्बको नागभूषणः ।

**lokottarasphuṭālokastryambako nāgabhūṣaṇaḥ |**

अन्धकारिर्मखद्वेषी विष्णुकन्धरपातनः ॥ १२५ ॥

**andhakārirmakhadveṣī viṣṇukandharapātanaḥ || 125||**

वीतदोषोऽक्षयगुणो दक्षारिः पूषदन्तहृत् ।

**vītadoṣo'kṣayaguṇo dakṣāriḥ pūṣadantahṛt |**

धूर्जटिः खण्डपरशुः सकलो निष्कलोऽनघः ॥ १२६ ॥

**dhūrjaṭiḥ khaṇḍaparaśuḥ sakalo niṣkalo'naghaḥ || 126||**

आधारः सकलाधारः पाण्डुराभो मृडो नटः ।

**ādhāraḥ sakalādhāraḥ pāṇḍurābho mṛḍo naṭaḥ |**

पूर्णः पूरयिता पुण्यः सुकुमारः सुलोचनः ॥ १२७ ॥

**pūrṇaḥ pūrayitā puṇyaḥ sukumāraḥ sulocanaḥ || 127||**

सामगेयः प्रियकरः पुण्यकीर्तिरनामयः ।

**sāmageyaḥ priyakaraḥ puṇyakīrtiranāmayaḥ |**

मनोजवस्तीर्थकरो जटिलो जीवितेश्वरः ॥ १२८ ॥

**manojavastīrthakaro jaṭilo jīviteśvaraḥ || 128||**

जीवितान्तकरो नित्यो वसुरेता वसुप्रियः ।

**jīvitāntakaro nityo vasuretā vasupriyaḥ |**

सद्गतिः सत्कृतिः सक्तः कालकण्ठः कलाधरः ॥ १२९ ॥

**sadgatiḥ satkṛtiḥ saktaḥ kālakaṇṭhaḥ kalādharaḥ || 129||**

मानी मान्यो महाकालः सद्भूतिः सत्परायणः ।

**mānī mānyo mahākālaḥ sadbhūtiḥ satparāyaṇaḥ |**

चन्द्रसञ्जीवनः शास्ता लोकगूढोऽमराधिपः ॥ १३० ॥

**candrasañjīvanaḥ śāstā lokagūḍho'marādhipaḥ || 130||**

लोकबन्धुर्लोकनाथः कृतज्ञः कृतिभूषणः ।

**lokabandhurlokanāthaḥ kṛtajñaḥ kṛtibhūṣaṇaḥ |**

अनपाय्यक्षरः कान्तः सर्वशास्त्रभृतां वरः ॥ १३१ ॥

**anapāyyakṣaraḥ kāntaḥ sarvaśāstrabhṛtāṁ varaḥ || 131||**

तेजोमयो द्युतिधरो लोकमायोऽग्रणीरणुः ।

**tejomayo dyutidharo lokamāyo'graṇīraṇuḥ |**

शुचिस्मितः प्रसन्नात्मा दुर्जयो दुरतिक्रमः ॥ १३२ ॥

**śucismitaḥ prasannātmā durjayo duratikramaḥ || 132||**

ज्योतिर्मयो निराकारो जगन्नाथो जलेश्वरः ।

**jyotirmayo nirākāro jagannātho jaleśvaraḥ |**

तुम्बवीणी महाकायो विशोकः शोकनाशनः ॥ १३३ ॥

**tumbavīṇī mahākāyo viśokaḥ śokanāśanaḥ || 133||**

त्रिलोकात्मा त्रिलोकेशः शुद्धः शुद्धी रथाक्षजः ।

**trilokātmā trilokeśaḥ śuddhaḥ śuddhī rathākṣajaḥ |**

अव्यक्तलक्षणोऽव्यक्तो व्यक्ताव्यक्तो विशाम्पतिः ॥ १३४ ॥

**avyaktalakṣaṇo'vyakto vyaktāvyakto viśāmpatiḥ || 134||**

वरशीलो वरतुलो मानो मानधनो मयः ।

**varaśīlo varatulo māno mānadhano mayaḥ |**

ब्रह्मा विष्णुः प्रजापालो हंसो हंसगतिर्यमः ॥ १३५ ॥

**brahmā viṣṇuḥ prajāpālo haṁso haṁsagatiryamaḥ || 135||**

वेधा धाता विधाता च अत्ता हर्ता चतुर्मुखः ।

**vedhā dhātā vidhātā ca attā hartā caturmukhaḥ |**

कैलासशिखरावासी सर्वावासी सतां गतिः ॥ १३६ ॥

**kailāsaśikharāvāsī sarvāvāsī satāṁ gatiḥ || 136||**

हिरण्यगर्भो हरिणः पुरुषः पूर्वजः पिता ।

**hiraṇyagarbho hariṇaḥ puruṣaḥ pūrvajaḥ pitā |**

भूतालयो भूतपतिर्भूतिदो भुवनेश्वरः ॥ १३७ ॥

**bhūtālayo bhūtapatirbhūtido bhuvaneśvaraḥ || 137||**

संयोगी योगविद्ब्रह्मा ब्रह्मण्यो ब्राह्मणप्रियः ।

**saṁyogī yogavidbrahmā brahmaṇyo brāhmaṇapriyaḥ |**

देवप्रियो देवनाथो देवज्ञो देवचिन्तकः ॥ १३८ ॥

**devapriyo devanātho devajño devacintakaḥ || 138||**

विषमाक्षः कलाध्यक्षो वृषाङ्को वृषवर्धनः ।

**viṣamākṣaḥ kalādhyakṣo vṛṣāṅko vṛṣavardhanaḥ |**

निर्मदो निरहंकारो निर्मोहो निरुपद्रवः ॥ १३९ ॥

**nirmado nirahaṁkāro nirmoho nirupadravaḥ || 139||**

दर्पहा दर्पितो दृप्तः सर्वर्तुपरिवर्तकः ।

**darpahā darpito dṛptaḥ sarvartuparivartakaḥ |**

सप्तजिह्वः सहस्रार्चिः स्निग्धः प्रकृतिदक्षिणः ॥ १४० ॥

**saptajihvaḥ sahasrārciḥ snigdhaḥ prakṛtidakṣiṇaḥ || 140||**

भूतभव्यभवन्नाथः प्रभवो भ्रान्तिनाशनः ।

**bhūtabhavyabhavannāthaḥ prabhavo bhrāntināśanaḥ |**

अर्थोऽनर्थो महाकोशः परकार्यैकपण्डितः ॥ १४१ ॥

**artho'nartho mahākośaḥ parakāryaikapaṇḍitaḥ || 141||**

निष्कण्टकः कृतानन्दो निर्व्याजो व्याजमर्दनः ।

**niṣkaṇṭakaḥ kṛtānando nirvyājo vyājamardanaḥ ।**

सत्त्ववान्सात्त्विकः सत्यकीर्तिस्तम्भकृतागमः ॥ १४२ ॥

**sattvavānsāttvikaḥ satyakīrtistambhakṛtāgamaḥ ।। 142।।**

अकम्पितो गुणग्राही नैकात्मा नैककर्मकृत् ।

**akampito guṇagrāhī naikātmā naikakarmakṛt ।**

सुप्रीतः सुमुखः सूक्ष्मः सुकरो दक्षिणोऽनलः ॥ १४३ ॥

**suprītaḥ sumukhaḥ sūkṣmaḥ sukaro dakṣiṇo'nalaḥ ।। 143।।**

स्कन्धः स्कन्धधरो धुर्यः प्रकटः प्रीतिवर्धनः ।

**skandhaḥ skandhadharo dhuryaḥ prakaṭaḥ prītivardhanaḥ ।**

अपराजितः सर्वसहो विदग्धः सर्ववाहनः ॥ १४४ ॥

**aparājitaḥ sarvasaho vidagdhaḥ sarvavāhanaḥ ।। 144।।**

अधृतः स्वधृतः साध्यः पूर्तमूर्तिर्यशोधरः ।

**adhṛtaḥ svadhṛtaḥ sādhyaḥ pūrtamūrtiryaśodharaḥ ।**

वराहशृङ्गधृग्वायुर्बलवानेकनायकः ॥ १४५ ॥

**varāhaśṛṅgadhṛgvāyurbalavānekanāyakaḥ ।। 145।।**

श्रुतिप्रकाशः श्रुतिमानेकबन्धुरनेकधृक् ।

**śrutiprakāśaḥ śrutimānekabandhuranekadhṛk ।**

श्रीवल्लभशिवारम्भः शान्तभद्रः समञ्जसः ॥ १४६ ॥

**śrīvallabhaśivārambhaḥ śāntabhadraḥ samañjasaḥ ।। 146।।**

भूशयो भूतिकृद्भूतिर्भूषणो भूतवाहनः ।
**bhūśayo bhūtikṛdbhūtirbhūṣaṇo bhūtavāhanaḥ ।**
अकायो भक्तकायस्थः कालज्ञानी कलावपुः ॥ १४७ ॥
**akāyo bhaktakāyasthaḥ kālajñānī kalāvapuḥ ।। 147।।**

सत्यव्रतमहात्यागी निष्ठाशान्तिपरायणः ।
**satyavratamahātyāgī niṣṭhāśāntiparāyaṇaḥ ।**
परार्थवृत्तिर्वरदो विविक्तः श्रुतिसागरः ॥ १४८ ॥
**parārthavṛttirvarado viviktaḥ śrutisāgaraḥ ।। 148।।**

अनिर्विण्णो गुणग्राही कलङ्काङ्कः कलङ्कहा ।
**anirviṇṇo guṇagrāhī kalaṅkāṅkaḥ kalaṅkahā ।**
स्वभावरुद्रो मध्यस्थः शत्रुघ्नो मध्यनाशकः ॥ १४९ ॥
**svabhāvarudro madhyasthaḥ śatrughno madhyanāśakaḥ ।। 149।।**

शिखण्डी कवची शूली चण्डी मुण्डी च कुण्डली ।
**śikhaṇḍī kavacī śūlī caṇḍī muṇḍī ca kuṇḍalī ।**
मेखली कवची खड्गी मायी संसारसारथिः ॥ १५० ॥
**mekhalī kavacī khaḍgī māyī saṁsārasārathiḥ ।। 150।।**

अमृत्युः सर्वदृक् सिंहस्तेजोराशिर्महामणिः ।
**amṛtyuḥ sarvadṛk siṁhastejorāśirmahāmaṇiḥ ।**
असंख्येयोऽप्रमेयात्मा वीर्यवान्कार्यकोविदः ॥ १५१ ॥
**asaṁkhyeyo'prameyātmā vīryavānkāryakovidaḥ ।। 151।।**

वेद्यो वेदार्थविद्गोप्ता सर्वाचारो मुनीश्वरः ।

**vedyo vedārthavidgoptā sarvācāro munīśvaraḥ |**

अनुत्तमो दुराधर्षो मधुरः प्रियदर्शनः ॥ १५२ ॥

**anuttamo durādharṣo madhuraḥ priyadarśanaḥ || 152||**

सुरेशः शरणं सर्वः शब्दब्रह्मसतां गतिः ।

**sureśaḥ śaraṇaṁ sarvaḥ śabdabrahmasatāṁ gatiḥ |**

कालभक्षः कलङ्कारिः कङ्कणीकृतवासुकिः ॥ १५३ ॥

**kālabhakṣaḥ kalaṅkāriḥ kaṅkaṇīkṛtavāsukiḥ || 153||**

महेष्वासो महीभर्ता निष्कलङ्को विशृङ्खलः ।

**maheṣvāso mahībhartā niṣkalaṅko viśṛṅkhalaḥ |**

द्युमणिस्तरणिर्धन्यः सिद्धिदः सिद्धिसाधनः ॥ १५४ ॥

**dyumaṇistaraṇirdhanyaḥ siddhidaḥ siddhisādhanaḥ || 154||**

निवृत्तः संवृतः शिल्पो व्यूढोरस्को महाभुजः ।

**nivṛttaḥ saṁvṛtaḥ śilpo vyūḍhorasko mahābhujaḥ |**

एकज्योतिर्निरातङ्को नरो नारायणप्रियः ॥ १५५ ॥

**ekajyotirnirātaṅko naro nārāyaṇapriyaḥ || 155||**

निर्लेपो निष्प्रपञ्चात्मा निर्व्यग्रो व्यग्रनाशनः ।

**nirlepo niṣprapañcātmā nirvyagro vyagranāśanaḥ |**

स्तव्यस्तवप्रियः स्तोता व्यासमूर्तिरनाकुलः ॥ १५६ ॥

**stavyastavapriyaḥ stotā vyāsamūrtiranākulaḥ || 156||**

निरवद्यपदोपायो विद्याराशिरविक्रमः ।

**niravadyapadopāyo vidyārāśiravikramaḥ |**

प्रशान्तबुद्धिरक्षुद्रः क्षुद्रहा नित्यसुन्दरः ॥ १५७ ॥

**praśāntabuddhirakṣudraḥ kṣudrahā nityasundaraḥ || 157||**

धैर्याग्र्यधुर्यो धात्रीशः शाकल्यः शर्वरीपतिः ।

**dhairyāgryadhuryo dhātrīśaḥ śākalyaḥ śarvarīpatiḥ |**

परमार्थगुरुर्दृष्टिर्गुरुराश्रितवत्सलः ॥ १५८ ॥

**paramārthagururdṛṣṭirgururāśritavatsalaḥ || 158||**

रसो रसज्ञः सर्वज्ञः सर्वसत्त्वावलम्बनः ।

**raso rasajñaḥ sarvajñaḥ sarvasattvāvalambanaḥ |**

❁❁❁

सूत उवाच –

**sūta uvāca -**

एवं नाम्नां सहस्रेण तुष्टाव वृषभध्वजम् ॥ १५९ ॥

**evaṁ nāmnāṁ sahasreṇa tuṣṭāva vṛṣabhadhvajam || 159||**

स्नापयामास च विभुः पूजयामास पङ्कजैः ।

**snāpayāmāsa ca vibhuḥ pūjayāmāsa paṅkajaiḥ |**

परीक्षार्थं हरेः पूजाकमलेषु महेश्वरः ॥ १६० ॥

**parīkṣārthaṁ hareḥ pūjākamaleṣu maheśvaraḥ || 160||**

गोपयामासकमलं तदैकं भुवनेश्वरः ।

**gopayāmāsakamalaṁ tadaikaṁ bhuvaneśvaraḥ |**

हृतपुष्पो हरिस्तत्र किमिदं त्वभ्यचिन्तयन् ॥ १६१ ॥

**hṛtapuṣpo haristatra kimidaṁ tvabhyacintayan || 161||**

ज्ञात्वा स्वनेत्रमुद्धृत्य सर्वसत्त्वावलम्बनम् ।

**jñātvā svanetramuddhṛtya sarvasattvāvalambanam |**

पूजयामास भावेन नाम्ना तेन जगद्गुरुम् ॥ १६२ ॥

**pūjayāmāsa bhāvena nāmnā tena jagadgurum || 162||**

ततस्तत्र विभुर्दृष्ट्वा तथाभूतं हरो हरिम् ।

**tatastatra vibhurdṛṣṭvā tathābhūtaṁ haro harim |**

तस्मादवततारशु मण्डलात्पावकस्य च ॥ १६३ ॥

**tasmādavatatārāśu maṇḍalātpāvakasya ca || 163||**

कोटिभास्करसंकाशं जटामुकुटमण्डितम् ।

**koṭibhāskarasaṁkāśaṁ jaṭāmukuṭamaṇḍitam ।**

ज्वालामालावृतं दिव्यं तीक्ष्णदंष्ट्रं भयङ्करम् ॥ १६४ ॥

**jvālāmālāvṛtaṁ divyaṁ tīkṣṇadaṁṣṭraṁ bhayaṅkaram ।। 164।।**

शूलटङ्कगदाचक्रकुन्तपाशधरं हरम् ।

**śūlaṭaṅkagadācakrakuntapāśadharaṁ haram ।**

वरदाभयहस्तं च दीपिचर्मोत्तरीयकम् ॥ १६५ ॥

**varadābhayahastaṁ ca dīpicarmottarīyakam ।। 165।।**

इत्थम्भूतं तदा दृष्ट्वा भवं भस्मविभूषितम् ।

**itthambhūtaṁ tadā dṛṣṭvā bhavaṁ bhasmavibhūṣitam ।**

हृष्टो नमश्चकाराशु देवदेवं जनार्दनः ॥ १६६ ॥

**hṛṣṭo namaścakārāśu devadevaṁ janārdanaḥ ।। 166।।**

दुद्रुवुस्तं परिक्रम्य सेन्द्रा देवास्त्रिलोचनम् ।

**dudruvustaṁ parikramya sendrā devāstrilocanam ।**

चचाल ब्रह्मभुवनं चकम्पे च वसुन्धरा ॥ १६७ ॥

**cacāla brahmabhuvanaṁ cakampe ca vasundharā ।। 167।।**

ददाह तेजस्तच्छम्भोः प्रान्तं वै शतयोजनम् ।

**dadāha tejastacchambhoḥ prāntaṁ vai śatayojanam ।**

अधस्ताच्चोर्ध्वतश्चैव हाहेत्यकृत भूतले ॥ १६८ ॥

**adhastāccordhvataścaiva hāhetyakṛta bhūtale ।। 168।।**

तदा प्राह महादेवः प्रहसन्निव शङ्करः ।

**tadā prāha mahādevaḥ prahasanniva śaṅkaraḥ ।**

सम्प्रेक्ष्य प्रणयाद्विष्णुं कृताञ्जलिपुटं स्थितम् ॥ १६९ ॥

**samprekṣya praṇayādviṣṇuṁ kṛtāñjaliputạṁ sthitam ।। 169।।**

ज्ञातं मयेदमधुना देवकार्यं जनार्दन ।

**jñātaṁ mayedamadhunā devakāryaṁ janārdana ।**

सुदर्शनाख्यं चक्रं च ददामि तव शोभनम् ॥ १७० ॥

**sudarśanākhyaṁ cakraṁ ca dadāmi tava śobhanam ।। 170।।**

यद्रूपं भवता दृष्टं सर्वलोकभयङ्करम् ।

**yadrūpaṁ bhavatā dṛṣṭaṁ sarvalokabhayaṅkaram ।**

हिताय तव यत्नेन तव भावाय सुव्रत ॥ १७१ ॥

**hitāya tava yatnena tava bhāvāya suvrata ।। 171।।**

शान्तं रणाजिरे विष्णो देवानां दुःखसाधनम् ।

**śāntaṁ raṇājire viṣṇo devānāṁ duḥkhasādhanam ।**

शान्तस्य चास्त्रं शान्तं स्याच्छान्तेनास्त्रेण किं फलम् ॥ १७२ ॥

**śāntasya cāstraṁ śāntaṁ syācchāntenāstreṇa kiṁ phalam ।। 172।।**

शान्तस्य समरे चास्त्रं शान्तिरेव तपस्विनाम् ।

**śāntasya samare cāstraṁ śāntireva tapasvinām ।**

योद्धुः शान्त्या बलच्छेदः परस्य बलवृद्धिदः ॥ १७३ ॥

**yoddhuḥ śāntyā balacchedaḥ parasya balavṛddhidaḥ ।। 173।।**

देवैरशान्तैर्यद्रूपं मदीयं भावयाव्ययम् ।

**devairaśāntairyadrūpaṁ madīyaṁ bhāvayāvyayam ।**

किमायुधेन कार्यं वै योद्धुं देवारिसूदन ॥ १७४ ॥

**kimāyudhena kāryaṁ vai yoddhuṁ devārisūdana ।। 174।।**

क्षमा युधि न कार्यं वै योद्धुं देवारिसूदन ।

**kṣamā yudhi na kāryaṁ vai yoddhuṁ devārisūdana ।**

अनागते व्यतीते च दौर्बल्ये स्वजनोत्करे ॥ १७५ ॥

**anāgate vyatīte ca daurbalye svajanotkare ।। 175।।**

अकालिके त्वधर्मे च अनर्थेवारिसूदन ।

**akālike tvadharme ca anarthevārisūdana ।**

एवमुक्त्वा ददौ चक्रं सूर्यायुतसमप्रभम् ॥ १७६ ॥

**evamuktvā dadau cakraṁ sūryāyutasamaprabham ।। 176।।**

नेत्रं च नेता जगतां प्रभुर्वै पद्मसन्निभम् ।

**netraṁ ca netā jagatāṁ prabhurvai padmasannibham ।**

तदाप्रभृति तं प्राहुः पद्माक्षमिति सुव्रतम् ॥ १७७ ॥

**tadāprabhṛti taṁ prāhuḥ padmākṣamiti suvratam ।। 177।।**

दत्त्वैनं नयनं चक्रं विष्णवे नीललोहितः ।

**dattvainaṁ nayanaṁ cakraṁ viṣṇave nīlalohitaḥ ।**

पस्पर्श च कराभ्यां वै सुशुभाभ्यामुवाच ह ॥ १७८ ॥

**pasparśa ca karābhyāṁ vai suśubhābhyāmuvāca ha ।। 178।।**

वरदोहं वरश्रेष्ठ वरान्वरय चेप्सितान्।

**varadohaṁ varaśreṣṭha varānvaraya cepsitān |**

भक्त्या वशीकृतो नूनं त्वयाहं पुरुषोत्तम ॥ १७९ ॥

**bhaktyā vaśīkṛto nūnaṁ tvayāhaṁ puruṣottama || 179||**

इत्युक्तो देवदेवेन देवदेवं प्रणम्य तम्।

**ityukto devadevena devadevaṁ praṇamya tam |**

त्वयि भक्तिर्महादेव प्रसीद वरमुत्तमम्॥ १८० ॥

**tvayi bhaktirmahādeva prasīda varamuttamam || 180||**

नान्यमिच्छामि भक्तानामार्तयो नास्ति यत्प्रभो ।

**nānyamicchāmi bhaktānāmārtayo nāsti yatprabho |**

तच्छ्रुत्वा वचनं तस्य दयावान् सुतरां भवः ॥ १८१ ॥

**tacchrutvā vacanaṁ tasya dayāvān sutarāṁ bhavaḥ || 181||**

पस्पर्श च ददौ तस्मै श्रद्धां शीतांशुभूषणः ।

**pasparśa ca dadau tasmai śraddhāṁ śītāṁśubhūṣaṇaḥ |**

प्राह चैवं महादेवः परमात्मानमच्युतम्॥ १८२ ॥

**prāha caivaṁ mahādevaḥ paramātmānamacyutam || 182||**

मयि भक्तश्च वन्द्यश्च पूज्यश्चैव सुरासुरैः ।

**mayi bhaktaśca vandyaśca pūjyaścaiva surāsuraiḥ |**

भविष्यति न संदेहो मत्प्रसादात्सुरोत्तम ॥ १८३ ॥

**bhaviṣyati na saṁdeho matprasādātsurottama || 183||**

यदा सती दक्षपुत्री विनिन्द्येव सुलोचना ।

**yadā satī dakṣaputrī vinindyeva sulocanā |**

मातरं पितरं दक्षं भविष्यति सुरेश्वरी ॥ १८४ ॥

**mātaraṁ pitaraṁ dakṣaṁ bhaviṣyati sureśvarī || 184||**

दिव्या हैमवती विष्णो तदा त्वमपि सुव्रत ।

**divyā haimavatī viṣṇo tadā tvamapi suvrata |**

भगिनीं तव कल्याणीं देवीं हैमवतीमुमाम् ॥ १८५ ॥

**bhaginīṁ tava kalyāṇīṁ devīṁ haimavatīmumām || 185||**

नियोगाद्ब्रह्मणः साध्वीं प्रदास्यसि ममैव ताम् ।

**niyogādbrahmaṇaḥ sādhvīṁ pradāsyasi mamaiva tām |**

मत्सम्बन्धी च लोकानां मध्ये पूज्यो भविष्यसि ॥ १८६ ॥

**matsambandhī ca lokānāṁ madhye pūjyo bhaviṣyasi || 186||**

मां दिव्येन च भावेन तदा प्रभृति शङ्करम् ।

**māṁ divyena ca bhāvena tadā prabhṛti śaṅkaram |**

द्रक्ष्यसे च प्रसन्नेन मित्रभूतमिवात्मना ॥ १८७ ॥

**drakṣyase ca prasannena mitrabhūtamivātmanā || 187||**

इत्युक्त्वान्तर्दधे रुद्रो भगवान्नीललोहितः ।

**ityuktvāntardadhe rudro bhagavānnīlalohitaḥ |**

जनार्दनोपि भगवान्देवानामपि सन्निधौ ॥ १८८ ॥

**janārdanopi bhagavāndevānāmapi sannidhau || 188||**

अयाचत महादेवं ब्रह्माणं मुनिभिः समम् ।

**ayācata mahādevaṁ brahmāṇaṁ munibhiḥ samam ।**

मया प्रोक्तं स्तवं दिव्यं पद्मयोने सुशोभनम् ॥ १८९ ॥

**mayā proktaṁ stavaṁ divyaṁ padmayone suśobhanam ।। 189।।**

यः पठेच्छृणुयाद्वापि श्रावयेद्वा द्विजोत्तमान् ।

**yaḥ paṭhecchṛṇuyādvāpi śrāvayedvā dvijottamān ।**

प्रतिनाम्नि हिरण्यस्य दत्तस्य फलमाप्नुयात् ॥ १९० ॥

**pratināmni hiraṇyasya dattasya phalamāpnuyāt ।। 190।।**

अश्वमेधसहस्रेण फलं भवति तस्य वै ।

**aśvamedhasahasreṇa phalaṁ bhavati tasya vai ।**

घृताद्यैः स्नापयेद्रुद्रं स्थाल्या वै कलशैः शुभैः ॥ १९१ ॥

**ghṛtādyaiḥ snāpayedrudraṁ sthālyā vai kalaśaiḥ śubhaiḥ ।। 191।।**

नाम्नां सहस्रेणानेन श्रद्धया शिवमीश्वरम् ।

**nāmnāṁ sahasreṇānena śraddhayā śivamīśvaram ।**

सोपि यज्ञसहस्रस्य फलं लब्ध्वा सुरेश्वरैः ॥ १९२ ॥

**sopi yajñasahasrasya phalaṁ labdhvā sureśvaraiḥ ।। 192।।**

पूज्यो भवति रुद्रस्य प्रीतिर्भवति तस्य वै ।

**pūjyo bhavati rudrasya prītirbhavati tasya vai ।**

तथास्त्विति तथा प्राह पद्मयोनेर्जनार्दनम् ॥ १९३ ॥

**tathāstviti tathā prāha padmayonerjanārdanam ।। 193।।**

जग्मतुः प्रणिपत्यैनं देवदेवं जगद्गुरुम् ।

**jagmatuḥ praṇipatyainaṁ devadevaṁ jagadgurum ।**

तस्मान्नाम्नां सहस्रेण पूजयेदनघो द्विजाः ॥ १९४ ॥

**tasmānnāmnāṁ sahasreṇa pūjayedanagho dvijāḥ ॥ 194॥**

जपेन्नाम्नां सहस्रं च स याति परमां गतिम् ॥ १९५ ॥

**japeennāmnāṁ sahasraṁ ca sa yāti paramāṁ gatim ॥ 195॥**

॥ इति श्रीलिङ्गमहापुराणे पूर्वभागे

**॥ iti śrīliṅgamahāpurāṇe pūrvabhāge**

सहस्रनामभिः पूजनाद्विष्णुचक्रलाभो

**sahasranāmabhiḥ pūjanādviṣṇucakralābho**

नामाष्टनवतितमोध्यायः ॥

**nāmāṣṭanavatitamodhyāyaḥ ॥**